श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ निर्वेदस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ निर्वेदस्तबकः ॥

शरणीकरणीयाङ्घ्रिं शाश्वत्तापत्रयातुरैः।
सर्वनिर्वेदशमनीं समस्तजननीं नुमः॥ १ ॥

अनुपासित तावकाङ्घ्रि पद्मा-
न्यपरामृष्ट परावरस्थितीनि।
जगदम्ब वृथैव जीर्यतो मे
समतीतानि हि जन्मनां शतानि॥ २ ॥

अपवर्गकथापथातिगानाम्
अनुदासीनहृषीककिङ्कराणाम्।
दिवसा बहवो वृथैव याताः
तव सानन्दमुपासनं विना नः॥ ३ ॥

अवधीरित साधुसङ्गमानाम्
अपचारेषु च बद्धकङ्कणानाम्।
कथमन्यतमं कृपानिधे मां
कमले हन्त वृथा कृथाः खलानाम्॥ ४ ॥

स्मारं स्मारं मलिनविषयान् मानसं मेऽवसन्नं
चारं चारं प्रतिखलगृहं जातखेदौ च पादौ।
कारं कारं कुजनविनुतिं क्लेशिता हन्त जिह्वा
वारं वारं वरजलनिधे किं नु विज्ञापयेयम्॥ ५ ॥

विहितमखिलं त्यक्त्वा कृत्वा च गर्हितमन्वहं
तदुचितफलान्यत्रामुत्राप्यहो कलयन्नहम्।
गुणगणनिधे मृत्वा मृत्वा कियन्ति युगानि वा
मुरविजयिनो जाये जायेयमस्मि भयातुरः॥ ६ ॥

www.prapatti.com

तृणत्याजं त्यक्त्वा त्रिजगति कलत्रादिविषयान्
प्रणत्या ते दिव्याः कति कति गतिं यान्ति कृतिनः।
अहं त्वेवं तावद्विषयविषयन्त्रेषु पतितः
विषीदन् संसारे विपदवसरे रोदिमि रमे॥ ७॥

जननि महति वंशे जन्म लब्धं ततः किं
विशदमधिगते वा वेदशास्त्रे ततः किम्।
सदसि कथकदर्पः सादितो वा ततः किं
भवजलधितरिस्त्वं भाविता चेन्न चित्ते॥ ८॥

अटित्वा दुर्देशान् सदसि च नटित्वा क्षितिभुजां
पठित्वा दीनोक्तीरपि फलमलब्ध्वाऽतिचपलः।
अपारैर्व्यापारैरलसतनुराराधनमहो
भवत्या हित्वाऽहं बलवदवसीदामि कमले॥ ९॥

निरन्तरमरुन्तुदैर्निरयवेदनापादनाद्
दुरासदधराभुजामलमपावनैः सेवनैः।
रमे ननु रमेत मे दुरितमोचके मेचके
घनस्तनि मनस्त्वया घटितनर्मणि ब्रह्मणि॥ १०॥

जनित हृदवसादं शुष्कनिर्वेदवादं
जननि जहदपार्थं शश्वदालम्ब्य धैर्यम्।
शरणमिह भजेयं संश्रितान्यैरजेयं
दनुजभिदमुदारं तं भवत्या सदारम्॥ ११॥

निर्विण्णमब्धिकन्ये
निरीक्ष्य मां शीतलैरपाङ्गलवैः।
अभिषिञ्चसि बलिवञ्चक
चरणद्वय शरण वरणसाम्राज्ये॥ १२॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे निर्वेदस्तबकः॥

www.prapatti.com